# *वाराहपुराणे नाचिकेतोपाख्यानम्*

**डा. कमला पाण्डेय**

प्राच्य वाङ्मये आख्यानोपाख्यानानां प्रस्तुतिच्छलेन यादृशी मनोहारिणी उपदेश प्रणाली विकसिता, साऽतीव लोकोपकारिणी। एषा सृतिः गभीरमपि चिन्तनं सहजरूपेण मानसे स्थापयति। न स्यादायासलेशोऽत्र-इति हृदि संकल्प्य तत्त्वचिन्तकैः स्वकीयं चिन्तनं क्वचिदाख्यानमुखेन क्वचिदुपाख्यानमुखेन प्रकटीकृतम्। यतोहि यत्कल्याणकरं तन्न असंस्कृतबुद्धिगम्यम्। अतः संस्कृत-बुद्धिगम्यं परमार्थतत्त्वं कथाच्छलेन बोधयितुम् एषा सरणिः स्वीकृता। तामेव परम्परामनुकृत्य प्राच्यग्रन्थेषु नचिकेतस उपाख्यानं श्रूयते।

भिन्न-भिन्न स्थलेषु अस्योपाख्यानस्य भिन्न-भिन्न रूपेण वर्णनमुपलभ्यते। मन्त्र-संहितायां, ब्राह्मणग्रन्थे, उपनिषदि, इतिहासे पुराणे च अस्योपाख्यानस्य क्वचित्संकेतरूपेण, क्वचिद् विशेषसन्दर्भे, क्वचित्तत्त्वनिरूपणाय, क्वचित्कथाप्रसङ्गे, क्वचिच्च कृताकृतफलश्रुतिरूपेण विस्तरेण वर्णनं विद्यते।

यद्यपि कुमारस्य नचिकेतसः कथा समानरूपेण श्रूयते, तथापि तत्त्वचिन्तन-प्रक्रियायां सर्वत्र वैविध्यं परिदृश्यते। नास्ति तत्र पुनरुक्तिः। सर्वेषां वर्णनानामेकत्र पर्यालोचनेन अस्योपाख्यानस्य साङ्गोपाङ्ग महत्त्वं प्रकाश्यते।

यद्यपि मन्त्रसंहितायाम् अस्योपाख्यानस्य नास्ति स्फुट उल्लेखः तथापि-

**यस्मिन् वृक्षे सुपलाशे देवैः सम्पिबते यमः।**
**अत्रा नो विश्पतिः पिता पुराणां अनुवेनति।।** ऋग्वेद 10.135.1

अस्य सूक्तस्य देवता यमः, यमगोत्र कुमार ऋषिः। सायणाचार्यस्य मतेन यमगोत्र कुमारो नचिकेतनामा। अतएव मन्त्रमिदं नाचिकेतोपाख्यानपरमिति।

*तैत्तिरीय-ब्राह्मणे* तृतीय काण्डे, एकादश प्रपाठके, अष्टमेऽनुवाके पक्ष्याकारवायुदेवतारूपेण नाचिकेताग्न्युपासनं विहितम्। अस्मिन्नेव सन्दर्भे एषा कथा श्रूयते। आसीत् पुरा वाजश्रवा नामा ऋषिः। तेन विश्वजिति यागे यागमध्ये एव सर्वस्वदानं ऋत्विग्भ्यः सङ्कल्पितम्। तस्य नचिकेता नाम पुत्र आस। दक्षिणासु नीयमानासु वृद्धासु गोषु तस्य हृदये श्रद्धा आविवेश। यागे पित्रा सर्वस्वदानं संकल्पितं, तथापि ऋत्विग्भ्यः, दुग्धहीनाः गावो दक्षिणासु कथं दीयन्ते? अहमपि पितुः वस्तु, अतएव सर्वस्वदानकर्त्रा अहमपिदेयः। इति सञ्चिन्त्य स त्रिवारं पितरम् अपृच्छत् - कस्मै मां दास्यतीति? सुतस्य एवंविधमाग्रहम् असहमानो जनकः क्षुब्धः सन्नब्रवीत् - मृत्यवे त्वां ददामीति। बालको नचिकेता हतप्रभः सञ्जातः। तस्मिनेनेव क्षणे अशरीरिणी दैवी वाक् तमब्रवीत् - 'पिता त्वां मृत्यवे प्रदत्तवान्। अतः त्वया तमुपगन्तव्यम्। यमस्तु प्रवासी। तस्यालयं प्राप्य त्रिरात्रिं यावत् उपवासं कुरु। प्रत्यागते च तस्मिन् ब्रूहि - त्रिरात्रिम् अनश्नन् अहं प्रथमायां प्रजाः, द्वितीयायां पशून् तृतीयायाञ्च सर्वं सुकृतं भक्षितवानस्मि'। दैवीगिरा आदिष्टो नचिकेता तथा चक्रे।

श्रुत्वेदं शास्त्रीयं वचनं यमो हृष्टः। तेन विचारितं - सत्कारार्हः खलु एषोऽर्भको न मारणीयः। अतः तं वरप्रार्थनाय प्रेरितवान्। नचिकेता वरत्रयं प्राथितवान् -

1. तव पुरीमुपेत्य अपि प्रतिनिवृत्य पितुः समीपं गच्छेयम्।
2. मम इष्टापूर्तं श्रौतं स्मार्तञ्च सुकृतं सुरक्षितं भवेत्।
3. पुनर्जन्मनिवृत्तिः कथं स्याद् - इति जिज्ञासा।

यमोऽपि प्रथमं तथास्तु इत्युक्त्वा द्वितीय वररूपेण अग्निविद्यायाः साङ्गोपाङ्गं विवेचनं चकार। तस्याग्नेर्नाम

नचिकेतसः नाम्रा कृतवान्। अक्षयमिष्टापूर्तं स्वर्गलोकावाप्तिः मृत्योरपक्षयमपि सम्यग्रूपेण अग्न्युपासनायाः फलमित्युक्तवान्।[1]

*कठोपनिषदि* उपाख्यानमिदं कीदृशं हृदयावर्जकम् इति विदितमेव विपश्चिताम्। कथा तु तथा सत्यपि काञ्चिन्नूतनतां संवहति। दक्षिणासु नीयमानासु गोषु कुमारस्य नचिकेतसः मनसि ईदृशी भावना उद्भूता –

**पीतोदका जग्धतृणा दुग्धदोहा निरिन्द्रियाः।**
**अनन्दा नाम ते लोकास्तान् स गच्छति ता ददत् ।।**[2]

पिता ईदृशं प्रज्ञापराधं विधाय दुःख-बहुलं लोकं मा गमत्, स्वात्मदानेन स रक्षणीय – इति मनसि संगोप्य स पृष्टवान् – कस्मै मां दास्यतीति। क्रुद्धेन जनकेन 'मृत्यवे त्वा ददाभिति' प्रत्युक्तम्। तदनु यममुपगम्य वरत्रयं ययाचे। द्वितीय वररूपेण स्वर्गसाधनभूताम् अग्निविद्यां जिज्ञासितवान्। सम्यगुपदिष्टाम् अग्निविद्यां यदा तथैव प्रत्यवदत् यथा यमेन उक्ता, तदा तुष्टः सन् यमः प्राह –

1. एतमग्निं तवैव प्रवक्ष्यन्ति जनाः
2. अकुत्सितां कर्ममयीं गतिञ्च गृहाण

द्वितीय वररूपेण प्राप्तव्याऽग्निविद्यया चित्तपरिशोधनपुरस्सरं तृतीयवररूपेण आत्मज्ञानसम्बन्धी जिज्ञासा प्रकटिता।[3] अभेददर्शी आचार्यो यमः शिष्यं सम्यक् परीक्ष्य[4] विद्यायोग्यताञ्च तस्य अवगम्य आत्मतत्त्वम् उपदिष्टवान्।[5]
*कठोपनिषदि* पीतोदकेति बीजरूपेण उपन्यस्तस्य मन्त्रस्य विस्तारः *महाभारते* गोमहिमारूपेण चित्रितः। तथा हि – उद्दालको ऋषिः स्वसुतं जलाहरणाय आदिष्टवान्। नदीवेगेन सर्वमपहृतत्वात् भोज्यपेयाभावेनाकुलितः पिता तं शप्तवान्। तस्य अतर्कितेन वाग्वज्रेण आहतः सन् नचिकेता गतसत्त्वः सन् सद्यो भूलुण्ठितः। तस्य विरहेण शोकाकुलस्य जनकस्य अश्रुपातेन सिक्तः सन् यदा पुनरुत्थितः – तदा चकितोऽसौ यमपुरीवृत्तान्त पित्रा पृष्टः नचिकेताऽब्रवीत् – वैवस्वतीसभायां समादृतः सन्नहं यमेन प्रोक्तः – तव पिता यमपुरीं द्रष्टुमादिष्टवान् अतः न मृतोऽसि। तदा पुण्यात्मनां लोकान् दिदृक्षुरहं पयः परिपूर्णा नदीमवलोक्य अपृच्छम् –

क्षीरस्यैताः सर्पिषश्चैव नद्यः
शश्वत् स्त्रोताः कस्य भोज्याः प्रदिष्टाः।[6]

यमोऽब्रवीत् – ये गोरसानां दातारः ये च गोप्रदाने रताः तेषां कृते एतादृशाः शोकरहिता लोकाः सन्ति। इत्थं गोदानं प्राचुर्येण प्रशंसन् यम उक्तवान् जरसा विकलः गाः ददानाः नरकं प्राप्नुवन्तीति।[7]
पौराणिक नाचिकेतमुपाख्यानं *वाराहपुराणे* सविस्तरं श्रूयते। तत्र एषा कथा पुरावृत्ता इत्युक्ता। तेन अस्योपाख्यानस्य प्राचीनता सिध्यति –

**शृणु राजन् पुरावृत्तां कथां परमशोभनाम्।**
**धर्मवृद्धिकरीं नित्यां यशस्यां कीर्तिवर्धिनीम्।।**[8]

अत्रापि रुष्टः पिता पुत्रं शशाप – यमपुरीं पश्यतु इति। पितरं धर्मधरातले स्थिरीकृत्य पुत्रः यमलोकं ययौ। यमः विधिपूर्वकं तं सत्कृत्य भूलोकं विसर्जितवान् –

**अर्चितस्तु यथान्यायं दृष्ट्वैव तु विसर्जितः।**[9]

प्रत्यावर्तितं स्वसुतमवलोक्य पिता प्रकामम् अप्रीयत। तस्मिन् समये नचिकेतसं साक्षात्कर्तुं विविधस्वभावाः ऋषयो मुनयोऽपि एकत्रिताः। तैः सर्वैः युगपदेव नचिकेता पृष्टः। ततः परं मनस्वी नचिकेता यमपुरी प्रसङ्गं विस्तरेण प्रतिपादितवान्।

सुवर्णनिर्मिता यमराजस्य पुरी परिखाद्वयेन परिवृता, सहस्रयोजन विस्तीर्णा अट्टालिकाभिः दिव्यभवनैश्च सुशोभिता। तत्र क्वचिद् भीषणः संग्रामो भवति क्वचिज्जन्तवः विवशाः बद्धाश्च दृश्यन्ते। तत्र एका पुष्पोदका नामा नदी अपरा तु वैवस्वती –

**वैवस्वती नाम महानदी सा शुभा नदीनां प्रवराऽतिरम्या।**
**प्रयाति मध्ये नगरस्य नित्यं मातेव पुत्रं परिपालयन्ती।**[10]

अस्याः सरितः जलं समेषां कृते सुखदायकम् सुवर्णनिर्मितैः सोपानैरियं रमणीया। तटवर्तिषु वृक्षेषु पुष्पफलानाञ्च प्राचुर्यम्। पुनरपि यमपुरी वर्णयन् ऋषिपुत्रो नचिकेता उवाच –

**दशयोजनविस्तारं ततो द्विगुणमायतम्।**
**प्राकारेण परिक्षिप्तं प्रासादशतशोभितम्।।**
**नानायन्त्रैः समाकीर्णं ज्वालामालासमायुतम्।**
**देवतानां ऋषीनाञ्च ये चाऽन्ये शुभकारिणः।।**
**प्रवेशस्तत्र तेषां हि विहितो धर्मदर्शिनाम्।।** 195.1-3

अपरत्र तु लौहनिर्मितं भयंकरं गोपुरं वर्णयन् नचिकेता प्राह –

**आयसं गोपुरं तत्र दक्षिणं भीमदर्शनम्।**
**रौद्रं प्रतिभयाकरं सुतप्तं दुर्निरीक्षणम्।।**
**प्रवेशो हि ततस्तेन विहितो रविसूनुनां।**
**पापिष्ठानां नृशंसानां क्रव्यादानां दुरात्मनाम्।।** 195.5-6

ये तु पापेषु रताः, परेषु शत्रुतामुपयान्ति, मांसभक्षिणो, दूषितस्वभावाः तेषां कृते 'औदुम्बर' अवीचिमान् तथा 'उच्चावच्च' संज्ञकाः परिखाः निर्मिताः। तस्याः पुर्याः पश्चिमगोपुरे अग्निज्वालाः ज्वाल्यन्ते। पापिनस्तु तमनुप्रविशन्ति।

तस्मिन् श्रेष्ठपुरे सभाभवनशोभां वर्णयन् नचिकेता आह –

**तस्मिन् पुरवरे रम्ये रम्या परमशोभना**
**सर्वरत्नमयी दिव्या वैवस्वत नियोजिता**
**सभा परमसम्पन्ना धार्मिकैः सत्यवादिभिः।।** 195.10-11

अस्या सभायां मनुः, प्रजापतिः, पाराशर्यो व्यासः, अत्रिः, औद्दालकिः, आपस्तम्बः, बृहस्पतिः, शुक्रः, गौतमः, शङ्खः, लिखितः, अङ्गिरा, भृगुः, पुलस्त्यः, पुलहः तथाऽन्ये धर्मधुरीणाः यमेन सह चिन्तनं कुर्वन्ति। (195.20-22) अपि च –

**तस्य पार्श्वे महादिव्या ऋषयो ब्रह्मवादिनः।**
**दीप्यमानाः स्व वपुषा वेदवेदाङ्ग पारगाः।।**
**वेदार्थानां विचारज्ञाः सत्यधर्मपुरस्कृताः।**
**छन्दः शास्त्रविकल्पज्ञाः शब्दशास्त्रविकल्पकाः।।**
**निरुक्तमतिवादाश्च साम-गान्धर्व-शोभिताः।**
**धातुवादाश्च विविधा निरुक्ताश्चैव नैगमाः।।** 195.20-22

किञ्च –

**तत्र चैव मया दृष्टा ऋषयः पितरस्तथा।**
**भवने धर्मराजस्य प्रगायन्तः कथाः शुभाः।।** 23

तत्रैव यमपार्श्वस्थः कृष्णवर्णो, महाहनुः, प्रवरेण दण्डेन समन्वितः, नित्यक्रुद्धो, भयानकः सनातनः कालः तिष्ठति। (24-25)

अपि च तस्यां पुर्यां यमेन पूज्यमाना एका देवी विराजमाना दृष्टा। तस्याङ्गेभ्यः क्लेशसम्भवा व्याधयः समुद्भूताः। सैव सर्वलोकानां गतीनां महागतिः अस्ति। तत्रैव मृत्युः दृष्टः -

**प्रकृत्या दुर्विनीतश्च महाक्रोधः सुदारुणः।**
**महासत्त्वो महातेजा जरामरणवर्जितः।**
**मृत्युर्दृष्टो दुराधर्षो दिव्यगन्धाऽनुलेपनः।।** 31

तेन मृत्युना सहवासिनः कालरहस्यज्ञा आसन्। ते दिव्याभरणशोभाभिः शोभमानाः आसन्। अन्ये च ज्वराः, वेदनाः धर्मराजसमीपस्थाः हलहलाशब्दैः धरां दारयन्तः आसन्। यमपुर्यां कूष्माण्डाः, यातुधानाः, मांसभक्षिणो राक्षसा अपि निवसन्ति। ते तु एकपादा, द्विपादाः, त्रिपादाः, बहुपादाश्च सन्ति। एवं विविधैः गणैः परिवृतो यमः सभामध्ये वर्तमानः मां मृतकं दर्शनं ददौ। मामवलोक्य तस्य रौद्रमपि वदनं सौम्यतां गतः।

**तस्यवक्त्रं महारौद्रं नित्यमेव भयानकं।**
**पश्यतस्तत्र मां विप्राः ततः सौम्यतरं बभौ।।** 196.4

अनन्तरं नचिकेतसा स्तुतः परितुष्टो यम उवाच -

**वरं वरय भद्रं ते यं वरं काङ्क्षसे द्विज।**
**शुभं वा श्रेयसा युक्तं जीवितं वाऽप्रामयम्।।** 22

श्रुत्वेदं नचिकेता न्यवेदयत् -

**द्रष्टुमिच्छाम्यहं** देव! तवदेशं **यथातथम्।**
**पापानां च शुभानाञ्च या गतिस्त्विह दृश्यते।**
**सर्व दर्शय में राजन् यदि त्वं वरदो मम।।** 24

एवमुक्तो महातेजाः यमः तं नचिकेतसं चित्रगुप्तसकाशं प्रेषयामास। चित्रगुप्तोऽपि दूतानादिदेश -

**अयं विप्रो यमादिष्टः प्रेतावासं गमिष्यति।।** 32
**यथाकाममयं पश्येद् धर्मराजपुरोत्तमम्।।** 35

तदा नचिकेता यातनैर्विविधैः घोरैः दह्यमानान् अपश्यत्। तेषां सम्पीड्यमानानां शोणितैः घोरा वैतरणी नाम्नी निम्नगा संभूता। तस्यां घोरायां वैतरण्यां सहस्रशः पापिनः प्रक्षिप्ताः। अन्ये बहवो जीवाः कूटशाल्मलि-वृक्षमारोप्य ताडिताः। तदनन्तरं यमदूताः पापाचारिणः असिपत्रवन-तालवन-संज्ञकेषु नरकेषु पातयन्ति। धूमज्वालासमाकुले दावाग्नि सदृशाकारेऽसितालवने ते दंदह्यन्ते।

नरकाणां स्वरूपवर्णनं नचिकेतसा इत्थं कृतम् -

**तप्तं चैव महातप्तं महारौरवरौरवो**
**सप्ततालश्च नरको नरकः कालसूत्रकः।**
**अन्धकारश्च परको अन्धकारपरस्तथा।** 198.1-2

एते अष्टौ नरकाः यत्र उत्तरोत्तरं द्विगुणं, त्रिगुणं चतुर्गुणक्रमानुसारं क्लेशयातनाः भुज्यन्ते। एतेषु विविधेषु

नरकेषु शृङ्गाटकवनम् अन्यतमम्। तप्तबालुकमिश्रितेऽस्मिन् शृगालाः श्यामाः शबलाः श्वानश्च जीवान् खादन्ति। अन्यत् कूटशाल्मलि नामकं नरकं कण्टकाकीर्णम्। तत्रैव शतयोजनविस्तीर्णा करम्भबालुका नदी। एषा अग्निज्वालासमा अतीव घोरा। ततो क्षारोदा वैतरणी महानदी। अन्या दशयोजनविस्तीर्णा यमचुल्ली नदी या नित्यं प्रज्ज्वलिता धूमाऽन्धकारिता च। दशलताशूलाः कुम्भीपाकास्तु त्रयोदश संख्याकाः। एतेषु नरकेषु अजस्रं क्लिश्यमानानां सुदारुणं हाहाकारसमाकुलः महानादौ श्रूयते।[11]

पुनः नचिकेता जगाद – एकवारं यमदूताः चित्रगुप्तं न्यवेदयन् – 'वयं श्रान्ताश्च क्षीणाश्च अन्यान् योजितुमर्हसीति।' कुपितः चित्रगुप्तः तैः सह संघर्षपरो बभूव। तस्मिन्नेव अवसरे धर्मराजो यमः संप्राप्तः। तदा युद्धः व्यरमत। तदनन्तरं यमचित्रगुप्तयोः संवादोऽजायत। ताभ्यां नरकक्लेशाः नरकयातना सम्यग् विवेचिताः।[12]

यमस्य चित्रगुप्तस्य च संवादे पुण्यकर्मिणामपि फलविधानं श्रूयते–

**अयं तु भयतां यातु यातु स्वर्ग महीक्षिताम्।**
**अन्यं वृक्षस्त्वयं तिर्यगयं मोक्षं व्रजेन्नरः।।** 203.2

अस्मिन्नेव प्रसंङ्गे ताभ्यां दानमहिमा अपि वर्णितः। अन्ते गोमहिमानं वर्णयता नचिकेतसा पतिव्रतोपाख्यानेन पातिव्रत-धर्मस्य महत्त्वं प्रतिपाद्य यमलोके पापपुण्यकर्मणां गतिः सम्यग् विस्तरेण विवेचिता।

*वाराहपुराणे* चित्रगुप्तमुखाद् गवां महिमा यथा प्रकटितः तस्य निदर्शनं विधीयते। तथाहि – गवां सर्वाङ्ग शरीरम् अखिल देवमयम्।

**सर्ववेदमया देव्यः सर्ववेदमयास्तथा**
**दन्तेषु मरुतो देवा जिह्वायां तु सरस्वती।**
**खुरमध्ये तु गन्धर्वाः खुराग्रेषु तु पन्नगाः।।**
**सर्वसिन्धुषु साध्याश्च चन्द्रादित्यो तु लोचने।**
**ककुदे सर्वनक्षत्रा लाङ्गूले धर्म आश्रितः।।**
**अपाने सर्वतीर्थानि प्रस्त्रवे जाह्नवी नदी।**
**नानाद्वीपसमाकीर्णाश्चत्वारः सागरास्तथा।।**
**ऋषयो रोमकूपेषु गोमये पद्मधारिणी।**
**रोमेषु सन्ति विद्याश्च त्क्केशेष्वयनद्वयम्।।** अ. 204.25-28

इदमत्रमवधेयम् – *ऋग्वेदादारभ्य*[13] *वाराहपुराणपर्यन्तं* नाचिकेतोपाख्याने गोमहिमा अनुस्यूतो विद्यते। एतेन विज्ञायते वैदिकी संस्कृतिः गो-संस्कृतिरस्तीति। कुमारस्य नचिकेतसः कथा दक्षिणासु नीयमानासु गोषु प्रारभ्यते। तत्तत् स्थलेषु उट्टङ्कित्तस्य उपाख्यानस्य उद्देश्यं भिन्नं स्याच्चेद् भवतु नाम, किन्तु कथामुखरूपेण गवांसङ्कीर्तनं सर्वत्रैव समानम्।

अपि च *कठोपनिषदि* द्वितीयवररूपायाः अग्निविद्यायाः निर्वचन प्रसङ्गे 'सृङ्का चेमामनेकरूपां गृहाण'[14] इति यमवचनेन अकुत्सितां कर्ममयीं गतिं गृहाण इत्युपदिष्टम्। तस्य विस्तारः *वाराहपुराणे* शुभाशुभकर्मफल[15] रूपेण नरकयातनाः[16] उत्तम लोक प्राप्तिवर्णनेन[17] विधीयते। किञ्च, उत्तमगवां दानेन उत्तम लोकः प्राप्येत[18] इत्यपि तत्र सुष्ठु प्रतिपादितम्। *वाराहपुराणे* कर्ममयी उपासना निर्दिश्यते। ज्ञानमयी उपासना तु *कठोपनिषदः* प्रतिपाद्यम्। अतएव तृतीयवररूपेण आत्मविद्यायाः याथातथ्यं विवेचनं तत्रैव उपलभ्यते इति शम्।

# संदर्भ


1. तै. ब्रा. 3.11.8
2. कठ उप. 1.1.3
3. वही 1.1.20
4. वही 1.1.21-25
5. वही 1.2
6. महाभारत अनुशासन पर्व 71.28
7. वही 71.29
8. वाराह पु. 191.9
9. वही 192.1
10. वही 194.22
11. द्र. वही अ. 198
12. वही अ. 199-202
13. क इमं दशभिर्ममेन्द्रं क्रीणाति धेनुभि: ऋग्वेद 4.24.10
14. कठोपनिषद् 1.1.16 शा. भा.
15. स्वकर्म भुज्यते तात प्रयत्नेन च मानवै:।।
    इह चैव कृतं यत्तु तत्परत्रोपभुज्यते।
    करोति यदि तत्कर्म शुभं वा यदि वाऽशुभम्।। वाराह पुराण अ. 192.22-23
16. हाहाभूताश्च चिन्तार्ता: सर्वदोषसमन्विता:।
    परं पारमजानन्तो रमन्ते कालमायया।
    क्लिश्यन्ते बहवस्तत्र कृत्वा पापमचेतस:।। वही 193.28-29
17. वाराह पुराण अ. 205-206
18. अमराख्यो भवेत्तत्र गोलोकेषु समाहित:।। वही 204-19


•